# U.G. 1st Semester Examination - 2024

## SANSKRIT

## [MAJOR]

## Course Code : SANS-MJ-T-01

## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. निम्नलिखितेषु प्रश्नेषु यथेच्छं **दशानां** प्रश्नानामुत्तराणि सरलसुरगिरा देवनागरीलिपिञ्चाश्रित्य प्रदेयानि: 2×10=20

क) ''क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति:'' — श्लोकांशपादे 'क्व'-शव्दप्रयोगस्य किं तात्पर्यम्? स्वाल्पविषयमत्या सूर्यवंशस्य महिमाकीर्तनं केन सह तुलितम्?

ख) ''वृद्धत्वं जरसा विना'' — कमुद्दिश्य श्लोकांशस्यावतारणा? श्लोकांशस्य तात्पर्यं विश्लेषणीयम्।

ग) 'बुद्धचरितम्' इति महाकाव्यं केन विरचितम्? अस्य महाकाव्यस्य मुख्यरस: कोऽस्ति?

घ) दिलीपस्य पुत्रोत्पत्ते: प्रतिबन्धक: क:? अभिलाषसिद्धये वशिष्ठ: किमुपदिष्टवान्?

ङ) इन्द्रं संसेव्य उर्वीं प्रति दिलीपस्य प्रत्यागमनावसरे सुरभि: कुत्र स्थिताऽऽसीत्? किमर्थं दिलीप: तस्यां साधु नाचरितवान्?

च) ''अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मन:'' — क: कदा कस्मै इदं वाक्यमुक्तवान्?

छ) नन्दिनी का? सा खलु कीदृशी आसीत्?

ज) 'किरातार्जुनीयम्' — इत्यस्य व्युत्पत्तिगतोऽर्थः प्रदेयः। किरातार्जुनीये 'किरातः' कः?

झ) ''समाययौ युधिष्ठिरं द्वैतवने वनेचरः'' — 'द्वैतवनमि'त्यस्य कोऽर्थः?

ञ) ''अहो दुरन्ता बलवद्विरोधिता''—वक्ता कः? श्लोकपादस्यान्तर्निहितार्थः कः?

ट) दुर्योधनस्य त्रिगणः किमर्थं परस्परं न बाधते?

ठ) महाकविना माघेन विरचितं काव्यं किमस्ति? तत्र प्रतिनायकः कः?

ड) ''प्रवृत्तिसाराः खलु मादृशां गिरः'' — तात्पर्यं लेख्यम्।

ढ) ''न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः'' — कं प्रति कस्य उक्तिरियम्? 'मृषा'-पदस्य संस्कृतप्रतिशव्दो लेख्यः।

ण) 'कुमारसम्भवम्'- इति महाकाव्ये कति सर्गा वर्तन्ते? कुमारसम्भवे 'कुमारः' कोऽस्ति?

2. निम्नलिखितेषु प्रश्नेषु यथेच्छं **चतुर्णां** प्रश्नानामुत्तराणि संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयानि : 5×4=20

क) यस्य कस्यचिद**देकस्य** श्लोकस्य बङ्गानुवादः क्रियताम्-

i) व्युढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।

ii) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकुलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः।।



ख) यथामति भावार्थं प्रकाशय - **(एकस्य)** :

i) सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।

ii) विचित्ररुपाः खलु चित्तवृत्तयः।

ग) स्वपत्नीकेन दिलीपेन दृष्टं वशिष्ठाश्रमस्य नैसर्गिकचित्रं रघुवंशमहाकाव्यस्य प्रथमसर्गानुसारतो विशदीक्रियताम्।

घ) संक्षिप्तात्मिकां टीकां लिख - **(द्वयस्य)** :

i) वनेचरः

ii) स्वधर्मः

iii) अदेवमातृका

iv) सत्यधनः

ङ) संक्षिप्तात्मिकां टीकां लिख - **(एकस्य)** :

i) कविर्भर्ट्टि ii) अश्वघोषः

च) संक्षिप्तात्मिकां टीकां टीकय - **(एकस्य)** :

i) शिशुपालबधम् ii) नैषधीयचरितम्

3. निम्नलिखितेषु प्रश्नेषु यथेच्छं **द्वयोः** प्रश्नयोरुत्तरं संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयम्: 10×2=20

क) यस्य कस्यचिद**देकस्य** श्लोकस्य उत्सस्थलनिर्देशपुरःसरं संस्कृतभाषया सप्रसङ्गव्याख्या कार्या :

i) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः।।

ii) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः।।

ख) राज्ञा दीलिपेन सह मुनेर्वशिष्ठस्य पारस्परिककथनं रघुवंशस्य प्रथमसर्गानुसारत आलोचय।

ग) ''नृपस्य मन्यु-व्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः।।'' - किरातार्जुनीयस्य प्रथमसर्गमनुसृत्य युधिष्ठिरं प्रति द्रौपद्या उक्तेः सार आलोच्यताम।

घ) संस्कृतसाहित्ये अश्वघोषस्य साहित्यकीर्तिविषये एकः प्रबन्धो लिख्यताम्।

---